# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा -दिसम्बर, २०१८

| कक्षा - शास्त्रिद्वितीयवर्षम्,सत्र-३ | प्रश्नपत्रम् – ८ | गुणा: - ७० |
|---|---|---|
| विषय: - रामानुजवेदान्त: | (C.E.2.3.6 - OLD ) | |
| दिनाङ्क: - १२/१२/२०१८ | तैत्तिरीय-ऐतरेयोपनिषदौ – रङ्गरामानुजभाष्यसहिते | समय:-०२:०० त: ०५.०० |

### प्रथमान्विति:

**प्रश्न: १ कयोश्चिद् द्वयो: मन्त्रयो: यथाभाष्यं व्याख्या कार्या।** **( १० )**

(१) ''भूर्भुव: सुवरिति वा एतास्तिस्रो व्याहृतय: । तासामु ह स्मैतां चतुर्थीम् । माहाचमस्य प्रवेदयते । मह इति । तद् ब्रह्म ।''

(२) पृथिव्यन्तरिक्षं द्यौर्दिशोऽवान्तरदिशा: अग्निर्वायुरादित्यचन्द्रमा नक्षत्राणि । आप ओषधयो वनस्पतय: । आकाश आत्मा । इत्यधिभूतम् ।

(३) ते तत्र ब्राह्मणा: संमर्शिन: । युक्ता आयुक्ता: । लुक्षा धर्मकामा: स्यु: । यथा ते तत्र वर्तेरन् । तथा तत्र वर्तेथा: ॥

**प्रश्न: २ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

(१) तैत्तिरीयोपनिषद: शान्तिमन्त्रं यथाभाष्यं व्याख्यात ।

(२) विद्याकर्मणो: मोक्षसाधनत्वं यथाभाष्यं प्रतिपादयत ।

### द्वितीयान्विति:

**प्रश्न: ३ कयोश्चिद् द्वयो: मन्त्रयो: यथाभाष्यं व्याख्या कार्या।** **( १० )**

(१) प्राणो ब्रह्मेति व्यजानात् । प्राणाद्ध्येव खल्विमानि भूतानि जायन्ते प्राणेन जातानि जीवन्ति । प्राणं प्रयन्त्यभिसंविशन्ति इति ॥

(२) ब्रह्मविदाप्नोति परम् । तदेषाभ्युक्ता । सत्यं ज्ञानम् अनन्तं ब्रह्म । यो वेद निहितं गुहायां परमे व्योमन् ॥

(३) असद्वा इदमग्र आसीत् । ततो वै सदजायत ।

**प्रश्न: ४ कस्यचिदेकस्य निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

(१) तैत्तिरीयोपनिषदनुसारं ब्रह्मण: स्वरूपं प्रतिपादयत ।

(२) भृगुवल्ल्या: सारांशं स्वशब्दै: लिखत ।

## तृतीयान्वितिः

**प्रश्नः ५ कयोश्चिद् द्वयोः मन्त्रयोः यथाभाष्यं व्याख्या कार्या।** **( १० )**

(१) स ईक्षतेमे नु लोका लोकपालान्नु सृजा इति ।
सोऽद्भ्यः एव पुरुषं समुद्धृत्यामूर्छयत् ॥

(२) तदपानेनाजिघृक्षत्तदावयत् । सेषौऽन्नस्य ग्रहो यद्वायुरन्नायुर्वा एष यद्वायुः ॥

(३) स जातो भूतान्यभिव्यैख्यत्किमिहान्यं वावदिषदिति ।
स एतमेव पुरुषं ब्रह्म ततममपश्यदिदमदर्शमिती ३ ॥

**प्रश्नः ६ कस्यचिदेकस्य यथाभाष्यं निबन्धात्मकम् उत्तरं लिखत ।** **( १० )**

(१) परमात्मनः ईक्षणपूर्वकसृष्टिप्रक्रियां प्रतिपादयत ।

(२) उपनिषदां परिचयं विलिख्य ऐतरेयोपनिषदः वैशिष्ट्यं प्रतिपादयत ।

**प्रश्नः ७ केषाञ्चन दशप्रश्नानाम् अतिलघूत्तराणि लिखत ।** **( १० )**

(१) तैत्तिरीयोपनिषत् कस्य वेदस्य ?

(२) शिक्षावल्ल्यां कति अनुवाकाः ?

(३) भृगुः कस्य पुत्रः आसीत् ?

(४) कः अभयं प्रतिष्ठां विन्दते ?

(५) अन्नात् काः प्रजायन्ते ?

(६) तैत्तिरीयोपनिषदि कति वल्ल्यः सन्ति ?

(७) कः सच्च त्यच्चाभवत् ?

(८) रसं लब्ध्वा कः आनन्दी भवति ?

(९) शतं मानुषाः आनन्दाः कस्य एकः आनन्दः ?

(१०) ब्रह्मप्रकाशनाय वाचः कथं निवर्तन्ते ?

(११) प्राणो ब्रह्मेति कः व्यजानात् ?

(१२) अस्याः सृष्टेः अग्रे किम् आसीत् ?

(१३) श्रीभाष्यं केन प्रणीतम् ?

(१४) निर्गुणं ब्रह्म के प्रतिपादयन्ति ?

(१५) के प्राणाः ?

--००--